# શ્રીવલ્લભગીતમ્

shrIvallabhagItam

sanskritdocuments.org

March 17, 2018

shrIvallabhagItam

# શ્રીવલ્લભગીતમ્

## Sanskrit Document Information

Text title : vallabhagItam

File name : vallabhagItam.itx

Category : deities_misc, gurudev, puShTimArgIya

Location : doc_deities_misc

Author : mAdhavadAsa

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 17, 2018

*sanskritdocuments.org*

# શ્રીવલ્લભગીતમ્

(અથ શ્રીવલ્લભગીતગ્રન્થાંશઃ)
શ્રીમદ્ગોકુલમણ્ડનં વરતનું કલ્યાણવારાન્નિધિં
વિઘ્નૌઘોન્મદનાગકુમ્ભદલનાતિપ્રૌઢસિંહાક્રમમ્ ।
ભક્તાપત્તિતમઃસમૂહહરણે શ્રીસૂર્યકોટિપ્રભં
વન્દેઽહં કમલાધવં દ્વિજવરં શ્રીવલ્લભં સત્પ્રિયમ્ ॥ ૧॥

યો ભક્તપ્રિયમાદરેણ કુરુતે વિન્દન્તિ યં નામરા
યેનૈવાપહૃતં જનસ્ય કલુષં તસ્મૈ નમો નિત્યશઃ ।
યસ્માત્સૌખ્યપદં ગતા હિ સુજના યસ્યાસ્ત્યનન્તા ગતિ-
સ્તસ્મિન્મે મતિરસ્તુ ગોકુલપતૌ શ્રીવલ્લભે સર્વદા ॥ ૨॥

નાહં કાવ્યવિચક્ષણઃ સુવિમલા બુદ્ધિર્ન મે સ્વોદ્ભવા
નાલઙ્કારગતિર્ન મે ગણિગતિર્નૈવાન્યદેવાશ્રયઃ ।
શ્રીમદ્ગોકુલનાથ વિટ્ઠલસુત શ્રીવિપ્રરૂપાકૃતે
શ્રીમદ્વલ્લભનાથ તે પદસરોજસ્યાસ્તિ વૈ મે બલમ્ ॥ ૩॥

ક્વાહં મન્દમતિસ્તથાલ્પવિષયાસક્તો મનુષ્યોઽપ્યથ
ક્વેદં ક્ષીરસમુદ્રકસ્ય મથનં સદ્રત્નકોત્પાદકમ્ ।
પઙ્ગુર્મેરુગિરેસ્તુ હીચ્છતિ યથાપ્યુલ્લઙ્ઘનં મન્દધીઃ
શ્રીમદ્વલ્લભવર્ણનં ખલુ તથેતીચ્છામિ મોહાશ્રિતઃ ॥ ૪॥

તથાપિ વૈ ગોકુલનાથપાદપઙ્કેરુહસ્યાતિબલં પ્રગૃહ્ય ચ ।
તસ્યાજ્ઞયા વલ્લભગીતમુદ્રસં કરોતિ સઙ્ક્ષેપત એવ માહબઃ ॥ ૫॥

અથ પ્રથમઃ પ્રબન્ધઃ કલ્યાણરાગેણ ગીયતે ।

શ્રીમલ્લોલવિલોચનલોકનલજ્જિતકોટિમનોજમ્ ।
આનન્દિતમમરાજભવાદિવિનમ્ય સુપાદસરોજમ્ ॥ ૧॥

નમામિ શ્રીવલ્લભમેકરસં રમતે સતતં વૈ સરસમ્ ॥ ધ્રુ૦॥

શ્રીગોકુલમણ્ડિતલલિતાનહાસવિમોહિતવિશ્વમજમ્ ।
આનન્દામ્બુજમુખવચનામૃતજીવિતકલિગ્રસિતાખિલમનુજમ્ ॥ ૨॥

નમામિ શ્રીવલ્લભમેકરસં રમતે સતતં વૈ સરસમ્ । ધ્રુ૦॥

આજાનુભુજયુગજનાભયદં શરણાગતકાલભયાપહરમ્ ।
સ ન કલિમલતૂલકદમ્બસમગ્રવિદાહકરં નૃવરમ્ ॥ ૩॥

નમામિ શ્રીવલ્લભમેકરસં રમતે સતતં વૈ સરસમ્ ॥ ધ્રુ૦॥

શ્રીવલ્લભકુલકુમુદાવલિસુખરાશિકરામલચન્દ્રમસમ્ ।
કોટિમદનબલદર્પહરં મધુરાધરહાસવિલાસરસમ્ ॥ ૪॥

નમામિ શ્રીવલ્લભમેકરસં રમતે સતતં વૈ સરસમ્ ॥ ધ્રુ૦॥

હીરકમણિગણજટિતકુણ્ડલરુચિશોભિતલોલકપોલવરમ્ ।
કલિકાલાર્તિજનિતભવતાપજનામૃતપૂરકપદ્મકરમ્ ॥ ૫॥

નમામિ શ્રીવલ્લભમેકરસં રમતે સતતં વૈ સરસમ્ ॥ ધ્રુ૦॥

વેદાગમ્યમનઙ્ગાલયહૃદયામ્બુજમદ્ભુતકેલિકરમ્ ।
ત્રિભુવનનિરુપમવિમલોદરહૃતમાનિનીમાનસમતિમધુરમ્ ॥ ૬॥

નમામિ શ્રીવલ્લભમેકરસં રમતે સતતં વૈ સરસમ્ ॥ ધ્રુ૦॥

શીતલસુભગચરણકમલાશ્રિતવલ્લભનિજસુખરાશિમલમ્ ।
નિર્મલચામીકરવરકલેવરરૂપવિમર્દિતકામખલમ્ ॥ ૭॥

નમામિ શ્રીવલ્લભમેકરસં રમતે સતતં વૈ સરસમ્ ॥ ધ્રુ૦॥

મનુજાકૃતિધારિણમતિલલિતં દ્વિજકુલમણ્ડનમઙ્ગનિવાસમ્ ॥

મન્મથમન્મથલલિતગતિં ચરણામ્બુજરક્ષિતમાહવદાસમ્ ॥ ૮॥

નમામિ શ્રીવલ્લભમેકરસં રમતે સતતં વૈ સરસમ્ ॥ ધ્રુ૦॥

શ્રીમદ્વલ્લભવારિધિં હ્યગણિતાનન્દોદકાલઙ્કૃતમ્ ।
વગૃમિ ખલુ મુક્તિશુક્તિમમલોદ્ભવાહુસદ્ભોગિનમ્ ॥ ૧॥

મુક્તાભક્તિમલં હિ મીનનયનં ચાવર્તનાભિં .. .. ।??દીમ્ ।
ભક્તશ્રેણિમમોઘનામતરણં સ્વેચ્છાગતિં તં ભજે ॥ ૨॥

ઇતિ શ્રીમાધવદાસવિરચિતં શ્રીવલ્લભગીતં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIvallabhagItam*

pdf was typeset on March 17, 2018

Please send corrections to *sanskrit@cheerful.com*